## વીતરાગ સ્તોત્ર

### પ્રથમ પ્રકાશ

યઃ પરાત્મા પરં જ્યોતિ; પરમઃ પરમેષ્ઠિનામ્;
આદિત્યવર્ણં તમસઃ પરસ્તાદામનન્તિ યમ્. ૧
સર્વે યેનોદમૂલ્યન્ત, સમૂલા, ક્લેશપાદપાઃ;
મૂર્ધ્ના યસ્મૈ નમસ્યન્તિ, સુરાસુરનરેશ્વરા. ૨
પ્રાવર્તન્ત યતો વિદ્યાઃ, પુરુષાર્થપ્રસાધિકઃ;
યસ્ય જ્ઞાનં ભવદ્ભાવિ--ભૂતભાવાવભાસકૃત્. ૩
યસ્મિન્વિજ્ઞાનમાનન્દં, બ્રહ્મચૈકાત્મતાં ગતમ્;
સ શ્રદ્ધેયઃ સચ ધ્યેયઃ; પ્રપદ્યે શરણં ચ તમ્. ૪
તેન સ્યાંનાથવાઁ સ્તસ્મૈ, સ્પૃહયેયં સમાહિતઃ;
તતઃ કૃતાર્થો ભૂયાસં, ભવેયં તસ્ય કિઙ્કરઃ. ૫
તત્ર સ્તોત્રેણ કુર્યાંચ, પવિત્રાં સ્વાં સરસ્વતીમ્;
ઇદંહિ ભવકાન્તારે, જન્મિનાં જન્મનઃ ફલમ્. ૬
ક્વાહં પશોરપિ પશુ-વીતરાગસ્તવઃ ક્વ ચ;
ઉત્તિતીર્ષુરરણ્યાનીં, પદ્ભ્યાં પઙ્ગુરિવાસ્મ્યતઃ. ૭
તથાપિ શ્રદ્ધામુગ્ધોઽહં, નોપાલભ્યસ્સ્ખલન્નપિ;
વિશૃઙ્ખલાપિ વાગ્વૃત્તિઃ, શ્રદ્દધાનસ્ય શોભતે. ૮
શ્રીહેમચન્દ્રપ્રભવાદ્વીતરાગસ્તવાદિતઃ
કુમારપાલભૂપાલઃ, પ્રાપ્નોતુ ફલમીપ્સિતમ્. ૯

### દ્વિતીય પ્રકાશ.

પ્રિયઙ્ગુસ્ફટિકસ્વર્ણ-પદ્મરાગાઞ્જનપ્રભઃ;
પ્રભો! તવાધૌતશુચિઃ, કાયઃ કમિવ નાક્ષિપેત્. ૧
મન્દારદામવન્નિત્ય-મવાસિતસુગન્ધિનિ;
તવાઙ્ગે ભૃઙ્ગતાં યાન્તિ, નેત્રાણિ સુરયોષિતામ્. ૨
દિવ્યામૃતરસાસ્વાદ-પોષપ્રતિહતા ઇવ;
સમાવિશન્તિ તે નાથ!, નાઙ્ગે રોગોરગવ્રજાઃ. ૩
ત્વય્યાદર્શતલાલીન-પ્રતિમાપ્રતિરૂપકે;
ક્ષરત્સ્વેદવિલીનત્વ-કથાઽપિ વપુષઃ કુતઃ?. ૪
ન કેવલં રાગમુક્તં, વીતરાગ! મનસ્તવ;
વપુઃસ્થિતં રક્તમપિ, ક્ષીરધારાસહોદરમ્. ૫
જગદ્વિલક્ષણં કિં વા, તવાન્યદ્વક્તુમીશ્મહે?;
યદવિસ્રમબીભત્સં, શુભ્રં માંસમપિ પ્રભો!. ૬
જલસ્થલસમુદ્ભૂતાઃ, સંત્યજ્ય સુમનઃ સ્રજઃ;
તવ નિઃશ્વાસસૌરભ્ય-મનુયાન્તિ મધુવ્રતાઃ. ૭
લોકોત્તરચમત્કારકરી તવ ભવસ્થિતિઃ;
યતો નાહારનીહારૌ, ગોચરશ્ચર્મચક્ષુષામ્. ૮

### તૃતીય પ્રકાશ

સર્વાભિમુખ્યતો નાથ!, તીર્થકૃન્નામકર્મજાત્;
સર્વથા સમ્મુખીનસ્ત્વમાનન્દયસિ યત્પ્રજાઃ. ૧
યદ્યોજનપ્રમાણેઽપિ, ધર્મદેશનસદ્મનિ,
સંમાન્તિ કોટિશસ્તિર્યગ્નૃદેવાઃ સપરિચ્છદાઃ. ૨
તેષામેવ સ્વસ્વભાષા-પરિણામમનોહરમ્;

jainuniversity.org
सर्व ज्ञानाय भवतु

અપ્યેકરૂપં વચનં, યત્તે ધર્માવબોધકૃત. ૩
સાગ્રેऽપિ યોજનશતે પૂર્વોત્પન્ના ગદામ્બુદાઃ,
યદઞ્જસા વિલીયન્તે, ત્વદ્વિહારાનિલોર્મિભિઃ. ૪
નાવિર્ભવન્તિ યદ્‌ભૂમૌ, મૂષકાઃ શલભાઃ શુકાઃ;
ક્ષણેન ક્ષિતિપક્ષિપ્તા, અનીતય ઇવેતયઃ. ૫
સ્ત્રીક્ષેત્રપદ્રાદિભવો, યદ્વૈરાગ્નિઃ પ્રશામ્યતિ;
ત્વત્કૃપાપુષ્કરાવર્ત-વર્ષાદિવ ભુવસ્તલે. ૬
ત્વત્પ્રભાવે ભુવિ ભ્રામ્યત્યશિવોચ્છેદડિંડિમે;
સમ્ભવન્તિ ન યન્નાથ!, મારયો ભુવનારયઃ. ૭
કામવર્ષિણિ લોકાનાં, ત્વયિ વિશ્વૈકવત્સલે
અતિવૃષ્ટિરવૃષ્ટિર્વા, ભવેદ્યન્નોપતાપકૃત્. ૮
સ્વરાષ્ટ્રપરરાષ્ટ્રેભ્યો, યત્ક્ષુદ્રોપદ્રવા દ્રુતમ્;
વિદ્રવન્તિ ત્વત્પ્રભાવાત્, સિંહનાદાદિવ દ્વિપાઃ. ૯
યત્ક્ષીયતે ચ દુર્ભિક્ષં, ક્ષિતૌ વિહરતિ ત્વયિ;
સર્વાદ્‌ભુતપ્રભાવાઢ્યે, જઙ્ગમે કલ્પપાદપે. ૧૦
યન્મૂર્ધ્નઃ પશ્ચિમે ભાગે, જિતમાર્તણ્ડમણ્ડલમ્;
મા ભૂદ્વપુર્દુરાલોકમિતીવોત્પિણ્ડિતં મહઃ. ૧૧
સ એષ યોગસામ્રાજ્યમહિમા વિશ્વવિશ્રુતઃ;
કર્મક્ષયોત્થો ભગવન્ કસ્ય નાશ્ચર્યકારણમ્?. ૧૨
અનન્તકાલપ્રચિત-મનન્તમપિ સર્વથા;
ત્વત્તો નાન્યઃ કર્મકક્ષમુન્મૂલયતિ મૂલતઃ. ૧૩
તથોપાયે પ્રવૃત્તસ્ત્વં, ક્રિયાસમભિહારતઃ;
યથાનિચ્છન્નુપેયસ્ય, પરાં શ્રિયમશિશ્રિયઃ. ૧૪
મૈત્રી પવિત્રપાત્રાય, મુદિતામોદશાલિને;
કૃપોપેક્ષાપ્રતીક્ષાય, તુભ્યં યોગાત્મને નમઃ. ૧૫

**ચતુર્થ પ્રકાશઃ**

મિથ્યાદૃશાં યુગાન્તાર્કઃ, સુદૃશામમૃતાઞ્જનમ્;
તિલકં તીર્થકૃલ્લક્ષ્મ્યાઃ, પુરશ્ચક્રં તવૈધતે. ૧
એકોऽયમેવ જગતિ, સ્વામીત્યાખ્યાતુમુચ્છ્રિતા,
ઉચ્ચૈરિન્દ્રધ્વજવ્યાજાત્તર્જની જંભવિદ્વિષા. ૨
યત્ર પાદૌ પદં ધત્તસ્તવ તત્ર સુરાસુરાઃ;
કિરન્તિપઙ્કજવ્યાજાચ્છ્રિયં પઙ્કજવાસિનીમ્. ૩
દાનશીલતપોભાવ-ભેદાદ્ધર્મં ચતુર્વિધમ્;
મન્યે યુગપદાખ્યાતું, ચતુર્વક્ત્રોऽભવદ્‌ભવાન્. ૪
ત્વયિ દોષત્રયાત્ ત્રાતું, પ્રવૃત્તે ભુવનત્રયીમ્;
પ્રાકારત્રિતયં ચક્રુસ્ત્રયોऽપિ ત્રિદિવૌકસઃ. ૫
અધોમુખાઃ કણ્ટકાઃ સ્યુર્ધાત્ર્યાં વિહરતસ્તવ;
ભવેયુઃ સમ્મુખીનાઃ કિં, તામસાસ્તિગ્મરોચિષઃ?. ૬
કેશરોમનખશ્મશ્રુ, તવાવસ્થિતમિત્યયમ્;
બાહ્યોऽપિયોગમહિમા, નાપ્તસ્તીર્થ કરૈઃપરૈઃ. ૭
શબ્દરૂપરસસ્પર્શ-ગન્ધાખ્યાઃ પઞ્ચ ગોચરાઃ,
ભજન્તિ પ્રાતિકૂલ્યં ન, ત્વદગ્રે તાર્કિકા ઇવ. ૮
ત્વત્પાદાવૃતવઃ સર્વે, યુગપત્પર્યુપાસતે;

jainuniversity.org

આકાલકૃતકન્દર્પ-સાહાયકભયાદિવ. ૯
સુગન્ધ્યુદકવર્ષેણ, દિવ્યપુષ્પોત્કરેણ ચ!;
ભાવિત્વત્પાદસંસ્પર્શાં, પૂજયન્તિ ભુવં સુરાઃ. ૧૦
જગત્પ્રતીક્ષ્ય ત્વાં યાન્તિ, પક્ષિણોઽપિ પ્રદક્ષિણમ્;
કા ગતિર્મહતાં તેષાં, ત્વયિ યે વામવૃત્તયઃ?. ૧૧
પઞ્ચેન્દ્રિયાણાં દૌઃશીલ્યં, ક્વ ભવેદ્દ્ભવદન્તિકે;
એકેન્દ્રિયોઽપિ યન્મુઞ્ચત્યનિલઃ પ્રતિકૂલતામ્. ૧૨
મૂર્ધ્ના નમન્તિ તરવસ્ત્વન્માહાત્મ્યચમત્કૃતાઃ;
તત્કૃતાર્થં શિરસ્તેષાં, વ્યર્થં મિથ્યાદૃશાં પુનઃ. ૧૩
જઘન્યતઃ કોટિસઙ્ખ્યાસ્ત્વાં સેવન્તે સુરાસુરાઃ;
ભાગ્યસમ્ભારલભ્યેઽર્થે, ન મન્દા અપ્યુદાસતે. ૧૪

**પંચમપ્રકાશઃ**

ગાયન્નિવાલિવિરુતૈ-ર્નૃત્યન્નિવ ચલૈર્દલૈઃ;
ત્વદ્ગુણૈરિવ રક્તોઽસૌ, મોદતે ચૈત્યપાદપઃ. ૧
આયોજનં સુમનસોઽધસ્તાન્નિક્ષિપ્તબન્ધનાઃ;
જાનુદઘ્નીઃ સુમનસો, દેશનોર્વ્યાં કિરન્તિ તે. ૨
માલવકૈશિકીમુખ્ય-ગ્રામરાગપવિત્રિતઃ;
તવ દિવ્યો ધ્વનિઃ પીતો, હર્ષોદ્ગ્રીવૈર્મૃગૈરપિ. ૩
તવેન્દુધામધવલા, ચકાસ્તિ ચમરાવલી;
હંસાલિરિવ વક્ત્રાબ્જ-પરિચર્યાપરાયણા. ૪
મૃગેન્દ્રાસનમારૂઢે, ત્વયિ તન્વતિ દેશનામ્;
શ્રોતું મૃગાસ્સમાયાન્તિ મૃગેન્દ્રમિવ સેવિતુમ્. ૫
ભાસાં ચયૈઃ પરિવૃતો જ્યોત્સ્નાભિરિવ ચન્દ્રમાઃ;
ચકોરાણામિવ દૃશાં, દદાસિ પરમાં મુદમ્. ૬
દુન્દુભિર્વિશ્વવિશ્વેશ!, પુરો વ્યોમ્નિ પ્રતિધ્વનન્;
જગત્યાપ્તેષુ તે પ્રાજ્યં, સામ્રાજ્યમિવ શંસતિ. ૭
તવોર્ધ્વમૂર્ધ્વં પુણ્યર્દ્ધિ-ક્રમસબ્રહ્મચારિણી
છત્રત્રયી ત્રિભુવન-પ્રભુત્વપ્રૌઢિશંસિની. ૮
એતાં ચમત્કારકરીં, પ્રાતિહાર્યશ્રિયં તવ;
ચિત્રીયન્તે ન કે દૃષ્ટ્વા, નાથ! મિથ્યાદૃશોઽપિ હિ?. ૯

**ષષ્ઠપ્રકાશઃ**

લાવણ્યપુણ્યવપુષિ, ત્વયિ નેત્રામૃતાઞ્જને;
માધ્યસ્થ્યમપિ દૌઃસ્થ્યાય, કિંપુનર્દ્વેષવિપ્લવઃ?. ૧
તવાપિ પ્રતિપક્ષોઽસ્તિ, સોઽપિ કોપાદિવિપ્લુતઃ;
અનયા કિંવદન્ત્યાપિ, કિં જીવન્તિ વિવેકિનઃ?. ૨
વિપક્ષસ્તે વિરક્તશ્ચેત્સ ત્વમેવાથ રાગવાન્;
ન વિપક્ષો વિપક્ષઃ કિં, ખદ્યોતો દ્યુતિમાલિનઃ?. ૩
સ્પૃહયન્તિ ત્વદ્યોગાય, યત્તેઽપિ, લવસત્તમાઃ;
યોગમુદ્રાદરિદ્રાણાં, પરેષાં તત્કથૈવ કા?. ૪
ત્વાં પ્રપદ્યામહે નાથં, ત્વાં સ્તુમસ્ત્વામુપાસ્મહે;
ત્વત્તો હિ ન પરસ્ત્રાતા, કિંબ્રૂમઃ? કિમુ કુર્મહે?. ૫
સ્વયં મલીમસાચારૈઃ, પ્રતારણપરૈઃ પરૈ;
વંચ્યતે જગદપ્યેતત્કસ્ય પૂત્કુર્મહે પુરઃ. ૬

jainuniversity.org
सर्व ज्ञानाय भवतु

નિત્યમુક્તાન્ જગજ્જન્મ-ક્ષેમક્ષયકૃતોદ્યમાન્;
વન્ધ્યાસ્તનન્ધયપ્રાયાન્, કો દેવાંશ્ચેતનઃ શ્રયેત્?. ૭
કૃતાર્થા જઠરોપસ્થ-દુઃસ્થિતૈરપિ દૈવતૈઃ;
ભવાદ્દશાન્નિહ્નુવતે. હાહા! દેવાસ્તિકાઃ પરે. ૮
ખપુષ્પપ્રાયમુત્પ્રેક્ષ્ય, કિઞ્ચિન્માનં પ્રકલ્પ્ય ચ;
સંમાન્તિ દેહે ગેહે વા, ન ગેહે નર્દિનઃ પરે. ૯
કામરાગસ્નેહરાગા-વીષત્કરનિવારણૌ;
દૃષ્ટિરાગસ્તુ પાપીયાન્, દુરુચ્છેદઃ સતામપિ. ૧૦
પ્રસન્નમાસ્યં મધ્યસ્થે, દશૌલોકમ્પૃણં વચઃ;
ઇતિ પ્રીતિપદે બાઢં, મૂઢાસ્ત્વય્યપ્યુદાસતે. ૧૧
તિષ્ઠેદ્વાયુર્દ્રવેદદ્રિ-ર્જ્વલેજ્જલમપિ ક્વચિત્;
તથાપિ ગ્રસ્તો રાગા દ્યૈર્નાપ્તો ભવિતુમર્હતિ. ૧૨

**સપ્તમપ્રકાશઃ**

ધર્માધર્મૌ વિના નાઙ્ગં, વિનાઙ્ગેન મુખં કુતઃ?;
મુખાદ્વિના ન વક્તૃત્વં, તચ્છાસ્તારઃ પરે કથમ્?. ૧
અદેહસ્યજગત્સર્ગે, પ્રવૃત્તિરપિ નોચિતા;
ન ચ પ્રયોજનં કિંચિત્સ્વાતન્ત્ર્યાન્ન પરાજ્ઞયા. ૨
ક્રીડયા ચેત્પ્રવર્તેત, રાગવાન્સ્યાત્કુમારવત્;
કૃપયાઽથ સૃજેત્તર્હિ, સુખ્યેવ સકલં સૃજેત્. ૩
દુઃખદૌર્ગત્યદુર્યોનિજન્માદિક્લેશવિહ્વલમ્;
જનં તુ સૃજતસ્તસ્ય, કૃપાલોઃ કા કૃપાલુતા?. ૪
કર્માપેક્ષઃ સ ચેત્તર્હિ, ન સ્વતન્ત્રોઽસ્મદાદિવત્;
કર્મજન્યે ચ વૈચિત્ર્યે, કિમનેન શિખણ્ડિના?. ૫
અથ સ્વભાવતો વૃત્તિ-રવિતર્ક્યા મહેશિતુઃ;
પરીક્ષકાણાં તર્હ્યેષ, પરીક્ષાક્ષેપડિણ્ડિમઃ. ૬
સર્વભાવેષુ કર્તૃત્વં જ્ઞાતૃત્વં યદિ સમ્મતમ્;
મતં નઃ સન્તિ સર્વજ્ઞા, મુક્તાઃ કાયભૃતોઽપિ ચ. ૭
સૃષ્ટિવાદકુહેવાકમુન્મુચ્યેત્યપ્રમાણકમ્;
ત્વચ્છાસને રમન્તે તે, યેષાં નાથ! પ્રસીદસિ. ૮

**અષ્ટમપ્રકાશઃ**

સત્ત્વસ્યૈકાન્તનિત્યત્વે, કૃતનાશાકૃતાગમૌ;
સ્યાતામેકાન્તનાશેઽપિ, કૃતનાશાકૃતાગમૌ. ૧
આત્મન્યેકાન્તનિત્યે સ્યાન્ન ભોગઃ સુખદુઃખયોઃ;
એકાન્તાનિત્યરૂપેઽપિ, ન ભોગઃ સુખદુઃખયોઃ. ૨
પુણ્યપાપે બન્ધમોક્ષૌ, ન નિત્યૈકાન્તદર્શને,
પુણ્યપાપે બન્ધમોક્ષૌ, નાનિત્યૈકાન્તદર્શને. ૩
ક્રમાક્રમાભ્યાં નિત્યાનાં, યુજ્યતેઽર્થક્રિયા ન હિ;
એકાન્તક્ષણિકત્વેઽપિ, યુજ્યતેઽર્થક્રિયા ન હિ. ૪
યદા તુ નિત્યાનિત્યત્વ રૂપતા વસ્તુનો ભવેત્;
યથાત્થ ભગવન્નૈવ, તદા દોષોઽસ્તિ કશ્ચન. ૫
ગુડો હિ કફહેતુઃ સ્યાન્નાગરં પિત્તકારણમ્
દ્વયાત્મનિ ન દોષોઽસ્તિ, ગુડનાગરભેષજે. ૬

jainuniversity.org
सर्व ज्ञानाय भवतु

દ્વયં વિરૂદ્ધં નૈકત્રા-ઽસત્પ્રમાણપ્રસિદ્ધિતઃ
વિરૂદ્ધવર્ણયોગો હિ, દૃષ્ટો મેચકવસ્તુષુ. ૭
વિજ્ઞાનસ્યૈકમાકારં, નાનાકારકરમ્બિતમ્,
ઇચ્છંસ્તથાગતઃ પ્રાજ્ઞો, નાનેકાન્તં પ્રતિક્ષિપેત્. ૮
ચિત્રમેકમનેકં ચ, રૂપં પ્રામાણિકં વદન્;
યોગો વૈશેષિકો વાપિ, નાનેકાન્તં પ્રતિક્ષિપેત્. ૯
ઇચ્છન્પ્રધાનં સત્ત્વાદ્યૈર્વિરૂદ્ધૈર્ગુમ્ફિતં ગુણૈઃ;
સાઙ્ખ્યઃ સઙ્ખ્યાવતાં મુખ્યો, નાનેકાન્તં પ્રતિક્ષિપેત્. ૧૦
વિમતિસ્સમ્મતિર્વાપિ, ચાર્વાકસ્ય ન મૃગ્યતે;
પરલોકાત્મમોક્ષેષુ, યસ્ય મુહ્યતિ શેમુષી. ૧૧
તેનોત્પાદવ્યયસ્થેમસમ્ભિન્નં ગોરસાદિવત્;
ત્વદુપજ્ઞં કૃતધિયઃ, પ્રપન્ના વસ્તુતસ્તુ સત્. ૧૨

**નવમ પ્રકાશઃ**

યત્રાલ્પેનાપિ કાલેન, ત્વદ્ભક્તૈઃ ફલમાપ્યતે;
કલિકાલઃ સ એકોઽસ્તુ કૃતં કૃતયુગાદિભિઃ. ૧
સુષમાતો દુઃષમાયાં, કૃપા ફલવતી તવ;
મેરૂતો મરૂભૂમૌ હિ, શ્લાઘ્યા કલ્પતરોઃ સ્થિતિઃ. ૨
શ્રાદ્ધશ્રોતા સુધીર્વક્તા, યુજ્યેયાતાં યદીશ! તત્,
ત્વચ્છાસનસ્ય સામ્રાજ્ય-મેકચ્છત્રં કલાવપિ. ૩
યુગાન્તરેઽપિ ચેન્નાથ! ભવન્ત્યુચ્છૃંખલાઃ ખલાઃ;
વૃથૈવ તર્હિ કુપ્યામઃ કલયે વામકેલયે. ૪
કલ્યાણસિદ્ધ્યૈ સાધીયાન્, કલિરેવ કષોપલઃ;
વિનાગ્નિં ગન્ધમહિમા, કાકતુણ્ડસ્ય નૈધતે. ૫
નિશિ દીપોઽમ્બુધૌ દ્વીપં, મરૌ શાખી હિમે શિખી;
કલૌ દુરાપઃ પ્રાપ્તોઽયં, ત્વત્પાદાબ્જરજઃકણઃ. ૬
યુગાન્તરેસુ ભ્રાન્તોઽસ્મિ, ત્વદ્દર્શનવિ-નાકૃતઃ
નમોઽસ્તુ કલયે યત્ર, ત્વદ્દર્શનમજાયત. ૭
બહુદોષો દોષહીનાત્ત્વત્તઃ કલિરશોભત;
વિષયુક્તો વિષહરાત્ફણીન્દ્ર ઇવ રત્નતઃ. ૮

**દશમ પ્રકાશઃ**

મત્પ્રસત્તેસ્ત્વત્પ્રસાદસ્ત્વત્પ્રસાદાદિયં પુનઃ;
ઇત્યન્યોન્યાશ્રયં ભિન્ધિ, પ્રસીદ ભગવન્! મયિ. ૧
નિરીક્ષિતું રૂપલક્ષ્મીં, સહસ્રાક્ષોઽપિ ન ક્ષમઃ;
સ્વામિન્! સહસ્રજીહ્વોઽપિ, શક્તો વક્તું ન તે ગુણાન્. ૨
સંશયાન્ નાથ! હરસે, ઽનુત્તરસ્વર્ગિણામપિ;
અતઃપરોઽપિ કિં કોઽપિ, ગુણઃ સ્તુત્યોઽસ્તિ વસ્તુતઃ?. ૩
ઇદં વિરૂદ્ધં શ્રદ્ધત્તાં, કથમશ્રદ્દધાનકઃ?;
આનન્દસુખસક્તિશ્ચ, વિરક્તિશ્ચ સમં ત્વયિ. ૪
નાથેયં ઘટ્યમાનાપિ, દુર્ઘટા ઘટતાં કથમ્?;
ઉપેક્ષા સર્વસત્ત્વેષુ, પરમા ચોપકારિતા. ૫
દ્વયં વિરુદ્ધં ભગવંસ્તવ નાન્યસ્ય કસ્યચિત્;
નિર્ગ્રન્થતા પરા યા ચ, યા ચોચ્ચૈશ્ચક્રવર્તિતા. ૬
નારકા અપિ મોદન્તે, યસ્ય કલ્યાણપર્વસુ;

Jainuniversity.org
સર્વ જ્ઞાનાય ભવતુ

પવિત્રં તસ્ય ચારિત્રં, કો વા વર્ણયિતું ક્ષમઃ?. ૭
શમોઽદ્ભુતોઽદ્ભુતં રૂપં, સર્વાત્મસુ કૃપાદ્ભુતા;
સર્વાદ્ભુતનિધીશાય, તુભ્યં ભગવતે નમઃ. ૮

**એકાદશ પ્રકાશઃ**

નિઘ્નન્પરીષહચમૂ-મુપસર્ગાન્પ્રતિક્ષિપન્;
પ્રાપ્તોઽસિ શમસૌહિત્યં, મહતાં કાપિ વૈદુષી. ૧
અરક્તો ભુક્તવાન્મુક્તિમદ્વિષ્ટો હતવાન્દ્વિષઃ;
અહો! મહાત્મનાં કોઽપિ, મહિમા લોકદુર્લભઃ?. ૨
સર્વથા નિર્જિગીષેણ, ભીતભીતેન ચાગસઃ
ત્વયા જગત્ત્રયં જિગ્યે, મહતાં કાપિ ચાતુરી. ૩
દત્તં ન કિઞ્ચિત્કસ્મૈચિન્નાત્તં કિઞ્ચિત્કુતશ્ચન;
પ્રભુત્વં તે તથાપ્યેતત્કલા કાપિ વિપશ્ચિતામ્. ૪
યદ્દેહસ્યાપિ દાનેન, સુકૃતં નાર્જિતં પરૈઃ;
ઉદાસીનસ્ય તન્નાથ!, પાદપીઠે તવાલુઠત્. ૫
રાગાદિષુ નૃશંસેન, સર્વાત્મસુ કૃપાલુના;
ભીમકાન્તગુણેનોચ્ચૈઃ, સામ્રાજ્યં સાધિતં ત્વયા. ૬
સર્વે સર્વાત્મનાઽન્યેષુ, દોષાસ્ત્વયિ પુનર્ગુણાઃ;
સ્તુતિસ્તવેયં ચેન્મિથ્યા, તત્પ્રમાણં સભાસદઃ. ૭
મહીયસામપિ મહાન્, મહનીયો મહાત્મનામ્;
અહો! મે સ્તુવતઃ સ્વામી, સ્તુતેર્ગોચરમાગમત્. ૮

**દ્વાદશ પ્રકાશઃ**

પટ્વભ્યાસાદરૈઃ પૂર્વં, તથા વૈરાગ્યમાહરઃ;
યથેહ જન્મન્યાજન્મ, તત્સાત્મીભાવમાગમત્. ૧
દુઃખહેતુષુ વૈરાગ્યં, ન તથા નાથ! નિસ્તુષમ્;
મોક્ષોપાયપ્રવીણસ્ય, યથા તે સુખહેતુષુ. ૨
વિવેકશાણૈ વૈરાગ્ય-શસ્ત્રં શાતં ત્વયા તથા;
યથા મોક્ષેઽપિ તત્સાક્ષાદકુણ્ઠિતપરાક્રમમ્. ૩
યદા મરુન્નરેન્દ્રશ્રીસ્ત્વયા નાથોપભુજ્યતે;
યત્ર તત્ર રતિર્નામ, વિરક્તત્વં તદાપિ તે. ૪
નિત્યં વિરક્તઃ કામેભ્યો, યદા યોગં પ્રપદ્યસે;
અલમેભિરિતિ પ્રાજ્યં, તદા વૈરાગ્યમસ્તિ તે. ૫
સુખે દુઃખે ભવે મોક્ષે, યદૌદાસીન્યમીશિષે;
તદાવૈરાગ્યમેવેતિ, કુત્ર નાસિ વિરાગવાન્?. ૬
દુઃખગર્ભે મોહગર્ભે વૈરાગ્યે નિષ્ઠિતાઃ પરે;
જ્ઞાનગર્ભંતુ વૈરાગ્યં, ત્વય્યેકાયનતાં ગતમ્. ૭
ઔદાસીન્યેઽપિ સતતં, વિશ્વવિશ્વોપકારિણે;
નમો વૈરાગ્યનિઘ્નાય, તાયિને પરમાત્મને. ૮

**ત્રયોદશ પ્રકાશઃ**

અનાહૂતસહાયસ્ત્વં, ત્વમકારણવત્સલઃ;
અનભ્યર્થિતસાધુસ્ત્વં, ત્વમસમ્બન્ધબાન્ધવઃ. ૧
અનક્તસ્નિગ્ધમનસમમૃજોજ્જ્વલવાક્પથમ્;
અધૌતામલશીલં ત્વાં, શરણ્યં શરણં શ્રયે. ૨
અચણ્ડવીરવૃત્તિના, શમિના શમવર્ત્તિના!;

jainuniversity.org
सर्व ज्ञानाय भवतु

ત્વયા કામમકુટ્યન્ત, કુટિલાઃ કર્મકણ્ટકાઃ. ૩
અભવાય મહેશાયા-ગદાય નરકચ્છિદે;
અરાજસાય બ્રહ્મણે, કસ્મૈચિદ્ભવતે નમઃ. ૪
અનુક્ષિતફલોદગ્રાદનિપાતગરીયસઃ;
અસઙ્કલ્પિતકલ્પદ્રોસ્ત્વત્તઃ ફલમવાપ્નુયામ્. ૫
અસઙ્ગસ્ય જનેશસ્ય, નિર્મમસ્ય કૃપાત્મનઃ;
મધ્યસ્થસ્ય જગત્ત્રાતુરનઙ્કસ્તેઽસ્મિ કિઙ્કરઃ. ૬
અગોપિતે રત્નનિધાવવૃતે કલ્પપાદપે;
અચિન્ત્યે ચિન્તારત્ને ચ, ત્વય્યાત્માઽયં મયાર્પિતઃ. ૭
ફલાનુધ્યાનવન્ધ્યોઽહં, ફલમાત્રતનુર્ભવાન્;
પ્રસીદ યત્કૃત્યવિધૌ, કિઙ્કર્તવ્યજડે મયિ. ૮

**ચતુર્દશ પ્રકાશઃ**

મનોવચઃકાયચેષ્ટાઃ; કષ્ટાઃ સંહૃત્ય સર્વથા;
શ્લથત્વેનૈવ ભવતા, મનઃ શલ્યં વિયોજિતમ્. ૧
સંયતાનિ ન ચાક્ષાણિ, નૈવોચ્છૃઙ્ખલિતાનિ ચ;
ઇતિ સમ્યક્પ્રતિપદા, ત્વયેન્દ્રિયજયઃ કૃતઃ. ૨
યોગસ્યાષ્ટાઙ્ગતા નૂનં, પ્રપઞ્ચઃ કથમન્યથા?;
આબાલ ભાવતોઽપ્યેષ, તવ સાત્મ્યમુપેયિવાન્. ૩
વિષયેષુ વિરાગસ્તે ચિરં સહચરેષ્વપિ;
યોગે સાત્મ્યમદૃષ્ટેઽપિ, સ્વામિન્નિદમલૌકિકમ્. ૪
તથા પરે ન રજ્યન્ત, ઉપકારપરે પરે;
યથાઽપકારિણિ ભવા-નહો? સર્વમલૌકિકમ્. ૫
હિંસકા અપ્યુપકૃતા, આશ્રિતા અપ્યુપેક્ષિતાઃ;
ઇદં ચિત્રં ચરિત્રં તે, કેવા પર્યનુયુઞ્જતામ્?. ૬
તથા સમાધૌ પરમે, ત્વયાત્મા વિનિવેશિતઃ;
સુખી દુઃખ્યસ્મિ નાસ્મીતિ, યથા ન પ્રતિપન્નવાન્. ૭
ધ્યાતા ધ્યેયં તથા ધ્યાનં, ત્રયમેકાત્મતાં ગતમ્;
ઇતિ તે યોગમાહાત્મ્યં, કથં શ્રદ્ધીયતાં પરૈઃ?. ૮

**પંચદશ પ્રકાશઃ**

જગજ્જૈત્રા ગુણાસ્ત્રાત-રન્યે તાવત્તવાસતામ્;
ઉદાત્તશાન્તયા જિગ્યે, મુદ્રયૈવ જગત્ત્રયી. ૧
મેરૂસ્તૃણીકૃતો મોહાત્પયોધિર્ગોષ્પદીકૃતઃ;
ગરિષ્ઠેભ્યો ગરિષ્ઠો યૈ; પાપ્મભિસ્ત્વમપોહિતઃ. ૨
ચ્યુતશ્ચિન્તામણિઃ પાણેસ્તેષાં લબ્ધા સુધા મુધા;
યૈસ્ત્વચ્છાસનસર્વસ્વ મજ્ઞાનૈર્નાત્મસાત્કૃતમ્. ૩
યસ્ત્વય્યપિ દધૌ દૃષ્ટિ મુલ્મુકાકારધારિણીમ્;
તમાશુશુક્ષણિઃ સાક્ષાદાલપ્યાલમિદં હિ વા. ૪
ત્વચ્છાસનસ્ય સામ્યં યે, મન્યન્તે શાસનાન્તરૈઃ,
વિષેણ તુલ્યં પીયૂષં તેષાં હન્ત! હતાત્મનામ્. ૫
અનેઽમૂકા ભૂયાસુસ્તે, યેષાં ત્વયિ મત્સરઃ;
શુભોદર્કાય વૈકલ્યમપિ પાપેષુ કર્મસુ. ૬
તેભ્યો નમોઽઞ્જલિરયં, તેષાં તાન્સમુપાસ્મહે;
ત્વછાસનામૃતરસૈર્યૈરાત્માઽસિચ્યતાન્વહમ્. ૭

jainuniversity.org
सर्वो ज्ञानाय भवतु

ભુવે તસ્યૈ નમો યસ્યાં, તવ પાદનખાંશવઃ;
ચિરં ચૂડામણીયન્તે બ્રૂમહે કિમતઃ પરમ્?. ૮
જન્મવાનસ્મિ ધન્યોઽસ્મિ, કૃતકૃત્યોઽસ્મિ, યન્મુહુઃ;
જાતોઽસ્મિ ત્વદ્ગુણગ્રામરામણીયકલમ્પટઃ. ૯

**ષોડશ પ્રકાશઃ**

ત્વન્મતામૃતપાનોત્થા, ઇતઃ શમરસોર્મયઃ!
પરાણયન્તિ માં નાથ!, પરમાનન્દસમ્પદમ્. ૧
ઇતશ્ચાનાદિસંસ્કાર મૂર્ચ્છિતો મૂર્ચ્છયત્યલમ્;
રાગોરગવિષાવેગો, હતાશઃ કરવાણિ કિમ્?. ૨
રાગાહિગરલાઘ્રાતો, ઽકાર્ષં યત્કર્મ વૈશસમ્;
તદ્વક્તુમપ્યશક્તોઽસ્મિ, ધિગ્મે પ્રચ્છન્નપ્રાપતામ્. ૩
ક્ષણં સક્તઃ ક્ષણં મુક્તઃ, ક્ષણં ક્રુદ્ધઃ ક્ષણં ક્ષમીઃ
મોહાદ્યૈઃ ક્રીડયૈવાહં, કારિતઃ કપિચાપલમ્. ૪
પ્રાપ્યાપિ તવ સમ્બોધિં, મનોવાક્કાયકર્મજૈઃ,
દુશ્ચેષ્ટિતૈર્મયા નાથ! શિરસિ જ્વાલિતોઽનલઃ. ૫
ત્વય્યપિ ત્રાતરિ ત્રાત ર્યન્મોહાદિમલિમ્લુચૈઃ;
રત્નત્રયં મે હિયતે હતાશો હા! હતોઽસ્મિ તત્. ૬
ભ્રાન્તસ્તીર્થાનિ દૃષ્ટસ્ત્વં, મયૈકસ્તેષુ તારકઃ;
તત્તવાઙ્ઘ્રૌ વિલગ્નો ઽસ્મિ, નાથ! તારય તારય. ૭
ભવત્પ્રસાદેનૈવાહ-મિયતીં પ્રાપિતો ભુવમ્;
ઔદાસીન્યેન નેદાનીં, તવ યુક્તમુપેક્ષિતુમ્. ૮
જ્ઞાતા તાત! ત્વમેવૈકસ્ત્વત્તો નાન્યઃ કૃપાપરઃ;
નાન્યો મત્તઃકૃપા પાત્ર-મેધિ યત્કૃત્યકર્મઠઃ. ૯

**સપ્તદશ પ્રકાશઃ**

સ્વકૃતં દુષ્કૃતં ગર્હન્, સુકૃતં ચાનુમોદયન્;
નાથ! ત્વચ્ચરણૌ યામિ, શરણં શરણોજ્ઝિતઃ. ૧
મનોવાક્કાયજે પાપે, કૃતાનુમતિકારિતૈઃ,
મિથ્યા મે દુષ્કૃતં ભૂયાદપુનઃ ક્રિયયાન્વિતમ્. ૨
યત્કૃતં સુકૃતં કિંચિદ્રત્નત્રિતયગોચરમ્;
તત્સર્વમનુમન્યેઽહં, માર્ગમાત્રાનુસાર્યપિ. ૩
સર્વેષામર્હદાદીનાં, યો યોઽર્હત્ત્વાદિકો ગુણઃ;
અનુમોદયામિ તં તં, સર્વં તેષાં મહાત્મનામ્. ૪
ત્વાં ત્વત્ફલભૂતાન્ સિદ્ધાંસ્ત્વચ્છાસનરતાન્મુનીન્,
ત્વચ્છાસનં ચ શરણં, પ્રતિપન્નોઽસ્મિ ભાવતઃ. ૫
ક્ષમયામિ સર્વાન્સત્ત્વાન્સર્વે, ક્ષામ્યન્તુ તે મયિ;
મૈત્ર્યસ્તુ તેષુ સર્વેષુ, ત્વદેકશરણસ્ય મે. ૬
એકોઽહં નાસ્તિ મે કશ્ચિન્ન ચાહમપિ કસ્યચિત્,
ત્વદઙ્ઘ્રિશરણસ્થસ્ય, મમ દૈન્યં ન કિઞ્ચન. ૭
યાવન્નાપ્નોમિ પદવીં, પરાં ત્વદનુભાવજામ્;
તાવન્મયિ શરણ્યત્વં, મા મુઞ્ચ શરણં શ્રિતે. ૮

**અષ્ટાદશ પ્રકાશઃ**

ન પરં નામ મૃદ્વેવ, કઠોરમપિ કિઞ્ચન;
વિશેષજ્ઞાય વિજ્ઞપ્યં, સ્વામિને સ્વાન્તશુદ્ધયે. ૧

jainuniversity.org
सर्व ज्ञानाय भवतु

ન પક્ષિપશુસિંહાદિ વાહનાસી નવિગ્રહઃ;
ન નેત્રગાત્રવક્ત્રાદિ વિકારવિકૃતાકૃતિઃ. ૨
ન શૂલચાપચક્રાદિ શસ્ત્રાઙ્કકરપલ્લવઃ;
નાઙ્ગનાકમનીયાઙ્ગ પરિષ્વઙ્ગપરાયણઃ. ૩
ન ગર્હણીયચરિત પ્રકમ્પિતમહાજનઃ;
ન પ્રકોપપ્રસાદાદિ વિડમ્બિતનરામરઃ. ૪
ન જગજ્જનનસ્થેમ, વિનાશવિહિતાદરઃ;
ન લાસ્યહાસ્યગીતાદિ વિપ્લવોપપ્લુતસ્થિતિઃ. ૫
તદેવં સર્વદેવેભ્યસ્સર્વથા ત્વં વિલક્ષણઃ;
દેવત્વેન પ્રતિષ્ઠાપ્યઃ, કથં નામ પરીક્ષકૈઃ?. ૬
અનુશ્રોતઃ સરત્પર્ણ તૃણકાષ્ઠાદિ યુક્તિમત્;
પ્રતિશ્રોતઃ શ્રયદ્વસ્તુ, કયા યુક્ત્યા પ્રતીયતામ્?. ૭
અથવાઽલં મન્દબુદ્ધિ-પરીક્ષકપરીક્ષણૈઃ;
મમાપિ કૃતમેતેન, વૈયાત્યેન જગત્પ્રભો!. ૮
યદેવ સર્વસંસારિ-જન્તુરુપવિલક્ષણમ્;
પરીક્ષન્તાં કૃતધિયસ્તદેવ તવ લક્ષણમ્. ૯
ક્રોધલોભભયાક્રાન્તં, જગદસ્માદ્વિલક્ષણઃ;
ન ગોચરો મૃદુધિયાં, વીતરાગ! કથઞ્ચન. ૧૦

**એકોનવિંશતિતમ પ્રકાશઃ**

તવ ચેતસિ વર્તેઽહમિતિ વાર્ત્તાપિ દુર્લભા;
મચ્ચિત્તે વર્તસે ચેત્ત્વ-મલમન્યેન કેનચિત્. ૧
નિગૃહ્ય કોપતઃ કાંશ્ચિત્, કાંશ્ચિત્તુષ્ટ્યાઽનુગૃહ્ય ચ;
પ્રતાર્યન્તે મૃદુધિયઃ, પ્રલમ્ભનપરૈ પરૈઃ. ૨
અપ્રસન્નાત્કથં પ્રાપ્યં, ફલમેતદસઙ્ગતમ્?;
ચિન્તામણ્યાદયઃ કિં ન, ફલન્ત્યપિ વિચેતનાઃ?. ૩
વીતરાગ! સપર્યાતસ્તવાજ્ઞાપાલનં પરમ્;
આજ્ઞાઽઽરાદ્ધા વિરાદ્ધા ચ, શિવાય ચ ભવાય ચ. ૪
આકાલમિયમાજ્ઞા તે, હેયોપાદેયગોચરા;
આશ્રવઃ સર્વથા હેય, ઉપાદેયશ્ચ સંવરઃ. ૫
આશ્રવો ભવહેતુઃ સ્યાત્સંવરો મોક્ષકારણમ્;
ઇતીયમાર્હતીમુષ્ટિ-રન્યદસ્યાઃ પ્રપઞ્ચનમ્. ૬
ઇત્યાજ્ઞારાધનપરા, અનન્તાઃ પરિનિર્વૃતાઃ;
નિર્વાન્તિ ચાન્યે ક્વચન, નિર્વાસ્યન્તિ તથાઽપરે. ૭
હિત્વા પ્રસાદનાદૈન્ય-મેકયૈવ ત્વદાજ્ઞયા;
સર્વથૈવ વિમુચ્યન્તે, જન્મિનઃ કર્મપઞ્જરાત્. ૮

**વિંશતિતમ પ્રકાશઃ**

પાદપીઠલુઠન્મૂર્ધ્નિ, મયિ પાદરજસ્તવ;
ચિરં નિવસતાં પુણ્યપરમાણુકણોપમમ્. ૧
મદ્દૃશૌ ત્વન્મુખાસક્તે, હર્ષબાષ્પજલોર્મિભિઃ;
અપ્રેક્ષ્યપ્રેક્ષણોદ્ભૂતં, ક્ષણાત્ક્ષાલયતાં મલમ્. ૨
ત્વત્પુરો લુઠનૈર્ભૂયાન્મદ્ભાલસ્ય તપસ્વિનઃ;
કૃતાસેવ્યપ્રણામસ્ય, પ્રાયશ્ચિત્તં કિણાવલિઃ. ૩
મમ ત્વદ્દર્શનોદ્ભૂતાશ્ચિરં રોમાઞ્ચકણ્ટકાઃ,

jainuniversity.org

નુદન્તાં ચિરકાલોત્થા-મસદ્દર્શનવાસનામ્. ૪
ત્વદ્વક્ત્રકાન્તિજ્યોત્સ્નાસુ, નિપીતાસુ સુધાસ્વિવ;
મદીયૈર્લોચનામ્ભોજૈઃ, પ્રાપ્યતાં નિર્નિમેષતા. ૫
ત્વદાસ્યલાસિની નેત્રે, ત્વદુપાસ્તિકરૌ કરૌ;
ત્વદ્ગુણશ્રોતૃણી શ્રોત્રે, ભૂયાસ્તાં સર્વદા મમ. ૬
કુણ્ઠાપિ યદિ સોત્કણ્ઠા, ત્વદ્ગુણગ્રહણં પ્રતિ;
મમૈષા ભારતી તર્હિ, સ્વસ્ત્યેતસ્યૈ કિમન્યયા?. ૭
તવ પ્રેષ્યોઽસ્મિ દાસોઽસ્મિ, સેવકોઽસ્મ્યસ્મિ કિઙ્કરઃ;
ઓમિતિ પ્રતિપદ્યસ્વ, નાથ! નાતઃ પરં બ્રુવે. ૮
શ્રી હેમચન્દ્રપ્રભવા-દ્વીતરાગસ્તવાદિતઃ;
કુમારપાલભૂપાલઃ પ્રાપ્નોતુ ફલમીપ્સિતમ્. ૯

jainuniversity.org

सर्व ज्ञानाय भवतु